"तस्य धर्म्मार्थविदुषो भावमाज्ञाय सर्व्वशः ।
ब्राह्मणा बलमुख्याश्च पौरजानपदैः सह ॥")
चेष्टा । आत्मा । जन्म । इत्यमरः ।३।३।२०६ ॥ ( चित्तम् । यथा, मनुः । ४ । २२७ ।
"दानधर्म्मं निषेवेत नित्यमैष्टिकपौर्त्तिकम् ।
परितुष्टेन भावेन पात्रमासाद्य भक्तितः ॥")
क्रिया । लीला । पदार्थः । (यथा, रघुः ।३।४१।
"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः ॥" )
विभूतिः । बुधः । जन्तुः । इत्यादिः । इति मेदिनी । वे, २१ ॥ गौरवितः । अभिनयान्तरम् । इति त्रिकाण्डशेषः ॥ ( विषयः । यथा, हितोपदेशे ।
"अवश्यम्भाविनो भावा भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥"
पर्य्यालोचना । यथा मनुः । ६ । ८० ।
"यदा भावेन भवति सर्व्वभावेषु निःस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥"
प्रेम । यथा, गीतायाम् । १० । ८ ।
"इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥")
धात्वर्थः । ( यथा, मुग्धबोधे वोपदेवः । "देशाध्वकालभावं वाऽऽटैः ।" क्रियान्तरापेक्षि-क्रियाविशिष्टः तत्र सप्तमी विहिता तथा च मुग्धबोधटीकायां रामतर्कवागीशः । "यस्य क्रियया क्रियान्तरमपेक्ष्यते स इह भावः ॥") योनिः । उपदेशः । इति धरणिः ॥ संसारः । इत्यनेकार्थकोषः ॥ नवग्रहाणां शयनादिद्वादश-चेष्टाः । यथा,—
"शयनञ्चोपवेशश्च नेत्रपाणिः प्रकाशनम् ।
गमनं गमनेच्छा च सभायां वसतिस्तथा ॥
आगमनं भोजनञ्च नृत्यलिप्सा च कौतुकम् ।
निद्रा ग्रहाणां भावाश्च द्वादशैते प्रकीर्त्तिताः ॥"
भावानयनक्रमो यथा,—
"यद्राशौ विद्यते खेटस्तेन तं परिपूरयेत् ।
पुनरंशेन संपूर्य्य स्वर्क्षं तत्र नियोजयेत् ॥
जातदण्डं तथा लग्नमेकीकृत्य सदा बुधैः ।
रविणा भागहारेण शेषं कार्य्यं नियोजयेत् ॥
अंशेन नवसंख्यया । स्वर्क्षं ग्रहाणां जन्म-नक्षत्रम् । तद्यथा,—
"विशाखानलतोयानि वैष्णवं भगदैवतम् ।
पुष्या पौष्णो यमः सर्पो जन्मभान्यर्कतः क्रमात् ॥"
ऋक्षो राशिः । यदा मेषे ग्रहस्तदा १ एक-पूरितग्रहसंख्याङ्कः । यदा वृषे ग्रहस्तदा २ द्विपूरितो ग्रहसंख्याङ्कः कार्य्यः ॥ * ॥ जाया-सुतमृत्युतुङ्गस्वगृहत्रिकोणस्थानस्थितपापग्रहाणां निद्राशयनभावयोः फलम् ।
"निद्रायाञ्च यदा पापो जायास्थाने शुभं वदेत् ।
यदि पापः शुभैर्दृष्टो नाशुभैश्च कदाचन ॥
यदि वा शत्रुगेही स्याच्छयने यदि वेक्षितः ।
तदा नारीसमं तस्य नाशो भवति निश्चितम् ॥
शुभाशुभैर्यदा दृष्टः शुभग्रहसमन्वितः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥
सुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा ।
तदाशुभं भवेत्तस्य नात्र कार्य्या विचारणा ॥
तुङ्गस्थाने स्वगृहे वा त्रिकोणे वा यदा भवेत् ।
अपत्यस्य तदा नाशो जायते नात्र संशयः ॥
शुभग्रहो यदा तत्र क्रूरो वा यदि वेक्षितः ।
तदा प्रथमापत्यस्य नाशो भवति निश्चितम् ॥
मृत्युस्थाने स्थितः पापो निद्रायां शयनेऽपि वा ।
तदात्मनोऽपमृत्युः स्यादाजतोऽपरतोऽपि वा ॥
शुभग्रहो यदा तत्र मृत्युस्थानेऽपि संस्थितः ।
तदा च मरणं तस्य मृत्युस्थाने विशेषतः ॥
पापग्रहैर्यदा दृष्टः शुभो वा शत्रुवीक्षितः ।
तदा तस्य शिरश्छेदो मुनिना परिकीर्त्तितः ॥
एवं क्रमेण बोद्धव्यं ग्रहभावे सुबुद्धिना ।
बलाबलविचारेण जायते च शुभाशुभम् ॥
ज्योतिर्विदस्तु च सर्व्वेषु परिहारः कृतो मया ।
शयनादिकभावेषु ज्ञातव्यश्चोपदेशतः ॥
एकादशे वा दशमालये वा
धनालये वा यदि वा विलग्ने ।
पापेन युक्तो न शुभग्रहश्चे-
त्तथापि सिद्धिं महतीं वदन्ति ॥"
फलं यथा,—
"मन्दाग्निः पित्तशूली च जायते शयने नरः ।१।
उपवेशे भवेच्छिल्पी श्यामवर्णस्तथा नरः ॥२॥
नेत्रपाणौ भवेत् क्रूरो जलदोषो भवेन्नरः ।३।
पुण्यवान् धार्म्मिकश्चैव धनवांश्च प्रकाशने ॥४॥
गमने च रवेर्जातः कृपणो धनसंयुतः ।
बहुभाषी क्षमी क्रोधी लुब्धचित्तः सदा भवेत् ॥ ५ ॥
अल्पभोक्ता शीघ्रगामी दीर्घायुर्नृपवल्लभः ।
शूरः श्रीमान् सुशीलश्च गमनेच्छाभवो नरः ॥६॥
सभायाञ्च रवेर्जातः खलो दाता क्षमी भवेत् ।
दयालुः पण्डितो धीमान् गुणवान् पण्डित-प्रियः ॥ ७ ॥
आगमने भवेन्मूर्खः कुरूपो धनवान् भवेत् ।८।
भोजने भक्षको मांसलुब्धो महावपुर्बली ॥९॥
नृत्यलिप्सौ सुन्दरो वाग्मी पण्डितस्य गृहा-धिपः ।१०।
उत्साही च महाभोगी कौतुके च दिवाकरे ॥११॥
दाता भोक्ता प्रियः पुत्त्रकलत्राणां न संशयः ।
लिङ्गे देहे करे चैव गुदे रोगी तथैव च ।
निद्रायाञ्च भवेद्भागी क्रोधनो रक्तनेत्रकः ॥१२॥
इति रवेस्तुङ्गातुङ्गे बलाबले वा बोध्यम् ॥*॥
"शयने च विधौ क्रोधी दरिद्रो बहुलम्पटः ।१।
उपवेशे महारोगी धनवांश्च भवेन्नरः ॥ २ ॥
नेत्रदाणौ नेत्ररोगी श्लीपदी बहुभाषकः ।
क्रूरः खलोऽतिशूरश्च जायते च विधौ तदा ॥३॥
प्रकाशने निशानाथे धनवांश्च भवेन्नरः ।
दक्षो बुद्धिमान् दाता च परदारेषु लम्पटः ॥४॥
अरोगी वित्तहा चैव क्रूरकर्म्मा धनान्वितः ।
शिरोरोगी दन्तशूली जायते गमने विधौ ॥५॥
नानामतिर्महाक्रोधी सम्पदी च भवेन्नरः ।
गमनेच्छुर्विधौ जातो धनहीनो भवेत्तदा ॥६॥
दाता च धार्म्मिकश्चैव राजपात्रो भवेत् सदा ।
सभायाञ्च विधौ नित्यं जायते पुरुषोत्तमः ॥७॥
नित्यक्रोधी महादुःखी भवेदागमने विधौ ।८।
भोजने च भवेल्लुब्धो भक्षकश्च महाहरः ॥९॥
यो जातो नृत्यलिप्सायां गुणवान् धार्म्मिको भवेत् ।
बहुपात्रो धनी दाता जायते नात्र संशयः ॥१०॥
कौतुके च भवेद्रोगी नानाविद्यासु तत्परः ।
उत्साही च महाक्रोधी जायते च सुनिश्चितम् ॥११॥
निद्रायां दद्रुरोगी स्यात् क्लेशपापवलान्वितः ।
पुत्त्रशोकमहादुःखी नित्यं भ्रमति मेदिनीम् ॥१२
इति चन्द्रस्य ॥ * ॥
शयने च कुजे जातो लक्ष्मीबहुकुरङ्गकः ।
चण्डक्रोधी महादक्षः कृपणो जायते नरः ॥१॥
उपवेशे यदा भौमे जायते च नराधमः ।
धनवान् क्रूरकर्म्मा च निष्ठुरो जातिवर्ज्जितः ॥२॥
नेत्रपाणौ च यो जातः अचिरोगी भवेन्नरः ।
पुत्त्रदारधनैर्युक्तो दारिद्र्येणैव दृश्यते ॥ ३ ॥
प्रकाशने कुजे जातो धनवान् पण्डितः सुधीः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥ ४॥
गमने च यदा जातः प्रवासी नित्यदुःखितः ।
शरीरे च भवेद्रोगः कण्ड्वादिकुष्ठदद्रुकः ॥५॥
प्रवासी गमनेच्छायां गुदरोगी भवेच्च सः ।
धनहीनः कुकर्म्मा च जायते क्षितिजस्य च ॥६
सभायाञ्च यदा जातो धार्म्मिको बहुसम्पदः ।
गुणवांश्च महादाता शिरोरोगी भवेद्ध्रुवम् ॥७
कुजस्यागमने नित्यं खञ्जो भवति नान्यथा ।
कर्णरोगी पित्तशूली जायते च नराधमः ॥८॥
भोजने भूमिजस्यापि यो जातो मांसलुब्धकः ।
दुष्टकार्य्यो महाक्रोधी निर्व्वोत्साही धना-न्वितः ॥ ९ ॥
कुजस्य नृत्यलिप्सायां यो जातो धनवान् भवेत् ।
दाता भोक्ता सदा मानी राजपात्रो भवेच्च सः ॥ १० ॥
कौतुके क्षितिजस्यापि जातो भवति पण्डितः ।
नानाधनेन संयुक्तो बहुपुत्रो द्विभार्य्यकः ॥११॥
निद्रायां भूमिपुत्त्रस्य यो जातो मूर्ख एव सः ।
कलहो बान्धवैः सार्द्धं शोकक्लेशसमान्वितः ॥१२
इति मङ्गलस्य ॥
"बुधस्य शयने जातो धनवान् क्षुधितः सदा ।
अङ्गच्छेदो भवेद्वापि खञ्जो भवति नान्यथा ॥१॥
उपवेशे च यो जातः प्रवासी जायते ध्रुवम् ।
कविताशुभधीयुक्तो गौरवर्णो महाशयः ॥२॥
नेत्रपाणौ च यो जातः श्लीपदादिसमान्वितः ।
चक्षूरोगी विशेषात्तु स्यात् पुत्त्रनाशो भवेद्-ध्रुवम् ॥ ३ ॥
प्रकाशने भवेज्जातो राजपात्रो धनान्वितः ।
नानाधनेन संयुक्तो जायते वेदपारगः ॥ ४ ॥
गमने यो नरो जातः प्रवासी नित्यदुःखितः
शरीरे घातमाप्नोति नित्यम्लो भवेच्च सः ॥५॥
यो जातो गमनेच्छायां लम्पटो दुष्टचित्तकः ।
क्लीवशो दुष्टभार्य्यश्च कामुको बहुभाषकः ॥६॥